# श्रीसंक्षेपहरिनामामृतव्याकरणम्
# Śrī Saṃkṣepa Harināmāmṛta Vyākaraṇa
# The Shorter Grammar of the Nectar of Hari's Names
Version 0.2

श्रीजीवगोस्वामिविरचितम्
by
Śrī Jīva Gosvāmī
(edited, translated, and annotated
by
Nitai Das (Neal Delmonico),
assisted by Nilamadhava Das (Ernest Massengale))

June 18, 2005

# Contents

**Dedication** v

**1 Terminology and Sandhi** 1

1.1 Terminology . . . . . . . . . . . . . . . . . . . . . . . . . . . . 1

1.1.1 The Alphabet . . . . . . . . . . . . . . . . . . . . . . . . . 1

1.1.2 Technical Terms (अथ संज्ञा) . . . . . . . . . . . . . . . . . . 2

1.2 Sandhi सन्धिप्रकरणम् . . . . . . . . . . . . . . . . . . . . . . . . . . 8

1.2.1 Sarveśvara-sandhi (सर्वेश्वरसन्धिः) . . . . . . . . . . . . . . 8

1.2.2 Viṣṇujana Sandhi विष्णुजनसन्धिः . . . . . . . . . . . . . . . 13

1.2.3 Viṣṇusarga अथ विष्णुसर्गसन्धिः . . . . . . . . . . . . . . . . . 17

**2 Noun Declension** 21

2.1 Masculine nouns ending in vowels . . . . . . . . . . . . . . . . . 23

2.2 Feminine nouns ending in vowels . . . . . . . . . . . . . . . . . 34

# Dedication

कृष्णमुपासितुमस्य स्रजमिव नामावलिं तनवै ।
त्वरितं वितरेदेषा तत्साहित्यादिजामोदम् ॥ १ ॥

In order to worship Kṛṣṇa, I string together like a garland a succession of his names. May it quickly spread the joy produced by literature about him. (1)

आहतजल्पितजटिलं दृष्ट्वा शब्दानुशासनस्तोमम् ।
हरिनामावलिवलितं व्याकरणं वैष्णवार्थमाचिन्मः ॥ २ ॥

Seeing that a many grammars are flawed by by being convoluted with jibberish technical words, we have strung together a grammar for Vaiṣṇavas made of a garland of Hari's names. (2)

व्याकरणे मरुनीवृति जीवनलुब्धाः सदाघसंविग्नाः ।
हरिनामामृतमेतत्पिबन्तु शतधावगाहन्ताम् ॥ ३ ॥

Let those who are always distressed by and want to preserve their lives in the midst of the desert of grammar drink this nectar of the names of Hari and dip into it a hundred times. (3)

श्रीहरिं मधुरं नत्वा हरिनामामृतं रसम् ।
व्याकरणञ्च तद्भक्त्या पिबन्तु व्रजवासिनः ॥ ४ ॥

After offering obeisance to sweet Hari, may the residents of Vraja drink, with devotion to him, the grammar made of the juice of the nectar of his names. (4)

साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ॥
वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥ ५ ॥ (भाग्. ६.२.१४)

"They know that saying the name of Vaikuṇṭha, whether by convention or in joking, to fill in a gap or without intending to, removes innumerable sins." (Bhāg. 6.2.14) (5)

# Chapter 1

# Terminology and Sandhi

## 1.1 Terminology

### 1.1.1 The Alphabet

१ । नारायणाद्उद्भूतोऽयं वर्णक्रमः ।

From Nārāyaṇa is born this succession of letters.

अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः ।

क ख ग घ ङ ।

च छ ज झ ञ ।

ट ठ ड ढ ण ।

त थ द ध न ।

प फ ब भ म ।

य र ल व श ष स ह क्ष ।

एते 'वर्णाः' 'अक्षराणि' 'अलः' च ।

These are otherwise called the *varṇa*, the *akṣara*, and the *al*.

एषामुद्भवस्थानानि:

The places of the production of these are:

अ-आ-कवर्ग-ह-विसर्गाणां कण्ठः

a, ā, ka-varga (k, kh, g, gh, ṅ), and visarga (ḥ) [are produced] in the throat;

इ-ई-चवर्ग-य-शानां तालु

i, ī, ca-varga (c, ch, j, jh, ñ), ya, and ś [are produced] in the palate;

उ-ऊ-पवर्गाणामोष्ठः

u, ū, and the pa-varga (p, ph, b, bh, m) [are produced] at the lips;

ऋ-ॠ-टवर्ग-र-षाणां मूर्द्धा

ṛ, ṝ, ṭa-varga (ṭ, ṭh, ḍ, ḍh, ṇ), r, and ṣ [are produced] at the roof of the mouth;

ऌ-ॡ-तवर्ग-ल-सानां दन्ताः

ḷ, ḹ, ta-varga (t, th, d, dh, n), l, and s [are produced] at the teeth;

एदैतोः कण्ठतालू

e and ai with the throat and palate;

ओदौतोः कण्ठोष्ठम्

o and au with the throat and lips;

वकारस्य दन्तोष्ठम्

v with the teeth and lips;

अनुस्वारस्य शिरो नासिका वा इत्यादीनि ॥ १ ॥

*anusvāra* in the head or nose. (1)

### 1.1.2 Technical Terms (अथ संज्ञा)

२ । तत्रादौ चतुर्दश सर्वेश्वराः ।
स्वराः, अचश्च ॥ २ ॥

2. In that, the fourteen at the beginning are the Sarveśvara (Controllers of All).

They are also [known as] the vowels (*svara*) and *ac*.

३ । दश दशावताराः ।
समानाः, अकश्च ॥ ३ ॥

3. The first ten are the Ten Avatāra (Descents).

They are also [known as] the uniform ones (*samāna*) and *ak*.

४ । तेषां द्वौ द्वावेकात्मकौ ।
सवर्णसंज्ञा च ॥ ४ ॥

4. Each pair of them are Ekātmaka (Soul-mates).

and also are given the name "homogenous letters" (*savarṇa*).

५ । पूर्वो वामनः ।
ह्रस्वाः, निर्ह्रस्वाश् च ॥ ५ ॥

5. The prior [of each pair] is a Vāmana (Dwarf).

They are also the short vowels or the shortened.

६ । परस्त्रिविक्रमः ।
दीर्घाश् च ॥ ६ ॥

6. The latter is a Trivikrama (Giant).

They are also the long vowels.

७ । त्रिमात्रो महापुरुषः ।
प्लुत-संज्ञश्च ॥ ७ ॥

7. One lasting three measures is a a Mahāpuruṣa (Great Giant).

It also has the name "prolonged."

८ । अ-आ-वर्जिताः सर्वेश्वरा ईश्वराः ।
नामिनः, इचश् च ॥ ८ ॥

8. The Sarveśvara, minus "a" and "ā," are the Īśvara (Controllers).

They are also the "named ones" and *ic*.

९ । दशावतारा ईशाः ।
इकश् च ॥ ९ ॥

9. The Ten Avatāra, minus "a" and "ā," are the Īśa (Lords).

They are also *ik*.

१० । अ-आ-इ-ई-उ-ऊ अनन्ताः ।
अणाश् च ॥ १० ॥

10. a, ā, i, ī, u, and ū are the Ananta (Endless Ones).

They are also called *aṇ*.

११ । इ-ई-उ-ऊ चतुःसनाः ।
इणाश्च ॥ ११ ॥

11. i, ī, u, and ū are the Catuḥsana.[1]

[1] Sanaka, Sanandana, Sanatkumāra and Sanātana; incarnations of Viṣṇu born from Brahmā.

They are also called *iṇ*.

१२ । उ-ऊ-ऋ-ॠ चतुर्भुजाः ।
उकश्च ॥ १२ ॥

12. u, ū, ṛ, and ṝ are the Caturbhuja (Four-armed Ones).

They are also called *uk*.

१३ । ए-ऐ-ओ-औ चतुर्व्यूहाः ।
सन्ध्यक्षराणि, एचश्च । एते सर्वे त्रिविक्रमाः ॥ १३ ॥

13. e, ai, o, and au are the Caturvyūha (Four Expansions).

They are also known as compound vowels (*sandhyakṣara*) and *ec*. They are all Trivikrama.

१४ । अं इति विष्णुचक्रम् ।
अनुस्वारः, बिन्दुः, लवश्च ॥ १४ ॥

14. The nasal sound, "ṁ," is Viṣṇucakra (Viṣṇu's Discus).

This is also known as *anusvāra*, *bindu*, and *lava*.

१५ । अँ इति विष्णुचापः ।
अनुनासिकश्च ॥ १५ ॥

15. The nasalized letter अँ is Viṣṇucāpa (Viṣṇu' Bow).

It also known as the *anunāsika*.

१६ । अः इति विष्णुसर्गः ।
विसर्गः, विसर्जनीयः, विसृष्टः, अभिनिष्टानश्च ॥ १६ ॥

16. The final aspiration "aḥ" is Viṣṇusarga (Viṣṇu's Creation).

It is also known as *visarga*, *visarjanīya*, *visṛṣṭa*, and *abhiniṣṭāna*.

१७ । कादयो विष्णुजनाः ।
व्यञ्जनानि हलश्च । क-ष-संयोगे तु क्षः ॥ १७ ॥

17. The rest, beginning with "ka," are Viṣṇujana (Viṣṇu's People).

Also called the Consonants and *hal*. The union of k and ṣ produces kṣ — क्ष.

१८ । य-व-वर्जितास्तु बलाः ।
रलश्च ॥ १८ ॥

18. Viṣṇujana, minus "y" and "v," are the Bala (Forces).

They are also known as *ral*.

१९ । ते मान्ताः पञ्च पञ्च विष्णुवर्गाः ।
वर्गाश्च कु-चु-टु-तु-पु-नामानश्च ॥ १९ ॥

19. The five groups of five, from "k" to "m" among the Viṣṇujana, are called the Viṣṇuvarga (Groups of Viṣṇu).

The groups are also called "ku," "cu," "ṭu," "tu," and "pu."

२० । ञ-वर्जितास्तु विष्णुगणाः ।
मयः ॥ २० ॥

20. The Viṣṇuvarga minus ñ are the Viṣṇugaṇa (Folk of Viṣṇu).

Also known as *may*.

२१ । क-च-ट-त-पा हरिकमलानि ।
प्रथमाश्चपश्च ॥ २१ ॥

21. k, c, ṭ, t, and p are the Harikamala (Lotuses of Hari).

Also: the "first ones" and *cap*.

२२ । ख-छ-ठ-थ-फा हरिखड्गाः ।
द्वितीयाश्छफश्च ॥ २२ ॥

22. kh, ch, ṭh, th, and ph are the Harikhadga (Swords of Hari).

Also: the "second one" and *chaph*.

२३ । ग-ज-ड-द-बा हरिगदाः ।
तृतीया जबश्च ॥ २३ ॥

23. g, j, ḍ, d, and b are the Harigadā (Clubs of Hari).

Also: the "third ones" and *jab*.

२४ । घ-झ-ढ-ध-भा हरिघोषाः ।
चतुर्था झभश्च ॥ २४ ॥

24. gh, jh, ḍh, dh, and bh are Harighoṣa (Hari's Thunder).

Also: the "fourth ones" and *jhabh*.

२५ । ङ-ञ-ण-न-मा हरिवेणवः ।
पञ्चमा अनुनासिका ञमश्च ॥ २५ ॥

25. ṅ, ñ, ṇ, n, and m the Hariveṇu (Flutes of Hari).

Also: the "fifth ones," the nasals, and *ñam*.

२६ । त एतद्वर्जिता विष्णुदासाः ।
झपश्च ॥ २६ ॥

26. The Viṣṇuvarga minus the Hariveṇu are Viṣṇudāsa (Viṣṇu's Servants).

Also: *jhap*.

२७ । य-र-ल-वा हरिमित्राणि ।
अन्तःस्था यणश्च । एते सविष्णुचापा निर्विष्णुचापाश्च ॥ २७ ॥

27. y, r, l, and v are the Harimitra (Hari's Friends).

Also: the semivowels and *yaṇ*. They are sometimes with Viṣṇucāpa and sometimes without it.

२८ । श-ष-स-हा हरिगोत्राणि ।
उष्माणः षिटः शलश्च ॥ २८ ॥

28. ś, ṣ, s, and h are Harigotra (Hari's Family).

Also: the uṣman, *ṣiṭ*, and *śal*.

२९ । श-ष-साः शौरयः ।
शरश्च ॥ २९ ॥

29. ś, ṣ, and s are the Śauri.

Also: *śar*.

३० । विष्णुदास-हरिगोत्राणि वैष्णवाः ।
धुटो झलश्च ॥ ३० ॥

30. The Viṣṇudāsa and Harigotra are the Vaiṣṇava.

Also: *dhuṭ* and *jhal*.

३१ । हरिगदा-हरिघोष-हरिवेणु-हरिमित्राणि हश्च गोपालाः ।
घोषवन्तो हशश्च ॥ ३१ ॥

31. The Harigadā, Harighoṣa, Hariveṇu, Harimitra and "h" are the Gopāla (Cowherders).

Also: the voiced and *haś*.

३२ । यादवा अन्ये ।
अघोषाः खरश्च ॥ ३२ ॥

32. The others are the Yādava.

Also: the unvoiced and *khar*.

३३ । शौरिवर्जितास्तु सात्वताः ।
खपश्च ॥ ३३ ॥

33. The Yādava minus the Śauri (ś, ṣ, and s) are the Sātvata.

Also: *khap*.

३४ । वर्णस्वरूपे रामः । अट् इट् अकार इत्यादि च ॥ ३४ ॥

34. Rāma is used in indicating a letter itself.

Also: *aṭ*, *iṭ*, and *akāra*.

३५ । तदादिद्वये द्वयम् ।
अस्य लक्ष्मीनारायणवाचित्वाद्भगवन्नामता ॥ ३५ ॥

35. Each pair is called Dvaya.

Since Dvaya refers to Lakṣmī-Nārāyaṇa, it is a name of the Lord.

३६ । आदेशो विरिञ्चिः ॥ ३६ ॥

36. Substitution is Viriñci.

३७ । आगमो विष्णुः ॥ ३७ ॥

37. Insertion is Viṣṇu.

३८ । लोपो हरः ।
लुक् इत्यन्ये ॥ ३८ ॥

38. Elision is Hara.

This is also called *luk*.

३९ । सूत्राणि षड्विधानि ।

39. There are six kinds of *sūtra*.

> संज्ञा च परिभाषा च विधिर्नियम एव च ।
> अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणं ॥ इति ॥ ३९ ॥

The six kinds of *sūtra* are: 1. that which defines a name, 2. that which gives a general procedure, 3. that which gives a necessary rule, 4. that which restricts a rule, 5. that which gives a substitution, and 6. that which gives scope of application of a rule.

अत्र नामकरणं संज्ञादि सम्पूर्णम् ।

Here the assigning of terms and names is complete.

## 1.2 Sandhi सन्धिप्रकरणम्

### 1.2.1 Sarveśvara-sandhi (सर्वेश्वरसन्धिः)

यदिदं सन्धिनिर्माणं वर्णानामारभे मुदा ।
तेन मे कृष्णपादाब्जे मनःसन्धिर्विधीयताम् ॥

As I begin joyfully the construction of the combination of the letters, may my mind be combined with the lotus feet of Kṛṣṇa!

सन्धिरेकपदे नित्यं नित्यं धातूपसर्गयोः ।
अनित्यं सूत्रनिदेशेऽन्यत्र चानित्यमिष्यते ॥

Sandhi within a word is required, required between a verbal root and its prefix, optional in the prescription of a *sūtra*, and optional everywhere else.

४० । दशावतार एकात्मके मिलित्वा त्रिविक्रमः ।
कृष्णाग्रे, राधागता, हरि हरीति, हरीहा, विष्णूदयः, विष्णूढा, नरभ्रातॄषिः, गमॣ-कारः ॥ ४० ॥

40. A Daśāvatāra followed by its Ekātmaka forms a Trivikrama.

kṛṣṇa + agre = kṛṣṇāgre
rādhā + āgatā = rādhāgatā
hari hari + iti = hari harīti
hari + īhā = harīhā
viṣṇu + udayaḥ = viṣṇūdayaḥ
viṣṇu + ūḍhā = viṣṇūḍhā
narabhrātṛ + ṛṣiḥ = narabhrātṝṣiḥ
gamḷ + ḷkāraḥ = gamḹkāraḥ (40)

४१ । अद्वयमिद्वये ए ।
यादवेन्द्रः, गोकुलेशः, मथुरेशः ॥ ४१ ॥

41. A or ā followed by i or ī combine to form "e."

yādava + indraḥ = yādavendraḥ
gokula + īśaḥ = gokuleśaḥ
mathurā + īśaḥ = mathureśaḥ (41)

४२ । उद्वये ओ ।
पुरुषोत्तमः, सुपर्णोढः, द्वारकोत्सवः ॥ ४२ ॥

42. A or ā followed by u or ū combine to form ″o.″

puruṣa + uttamaḥ = puruṣottamaḥ
suparṇa + ūḍhaḥ = suparṇoḍhaḥ
dvārakā + utsavaḥ = dvārakotsavaḥ (42)

४३ । ऋद्वये अर् ।
कृष्णर्धिः ॥ ४३ ॥

43. A or ā followed by ṛ or ṝ combine to form ″ar.″

kṛṣṇa + ṛdhiḥ = kṛṣṇardhiḥ (43)

४४ । ऌद्वये अल् ।
यमुनल्कारायते ॥ ४४ ॥

44. A or ā followed by ḷ or ḹ combine to form ″al.″.

yamunā + ḷkārāyate = yamunalkārāyate (44)

४५ । एद्वये ऐ ।
कृष्णैकनाथः, कृष्णैश्वर्यम्, स्वैरम्, स्वैरी, स्वैरिणी च ॥ ४५ ॥

45. A or ā followed by e or ai combine to form ″ai.″

kṛṣṇa + ekanāthaḥ = kṛṣṇaikanāthaḥ
kṛṣṇa + aiśvaryam = kṛṣṇaiśvaryam
sva + īram = svairam[2]
sva + īrī = svairī
sva + īriṇī = svairiṇī (45)

४६ । ओद्वये औ ।
कृष्णौदनम्, कृष्णौन्नत्यम्, प्रौढः, प्रौढिश्च ॥ ४६ ॥

46. A or ā followed by o or au combine to form ″au.″

kṛṣṇa + odanam = kṛṣṇaudanam
kṛṣṇa + aunnatyam = kṛṣṇaunnatyam
pra + ūḍhaḥ = prauḍhaḥ[3]
pra + ūḍhiśca = prauḍhiśca (46)

४७ । इद्वयमेव यः सर्वेश्वरे ।
हर्यर्चनम्, हर्यासनम्, दध्युपेन्द्रस्य, रुक्मिरायेषा इत्यादि ॥ ४७ ॥

47. I or ī becomes ″y″ when followed by a Sarveśvara.

---

[2] This is governed by the sūtra स्वादीरेरिणोश्च तथा (1.56) which is not included in the short version of the grammar. It means: ″after sva, īra and īriṇa also take ‘ai.’″

[3] Covered by the sūtra प्राद्दूढ्योश्च तथा (1.58): after pra ūḍha and ūḍhi get ‘au.’

hari + arcanam = haryarcanam
hari + āsanam = haryāsanam
dadhi + upendrasya = dadhyupendrasya
rukmiṇī + eṣā = rukmiṇyeṣā
iti + ādi = ityādi (47)

४८ । उद्वयं वः ।
मध्वरिः, विष्णवाश्रितः ॥ ४८ ॥

48. U or ū becomes "v" when followed by a Sarveśvara.

madhu + ariḥ = madhvariḥ
viṣṇu + āśritaḥ = viṣṇvāśritaḥ (48)

४९ । ऋद्वयं रः ।
रामभ्रात्रुदयः, रामभ्रात्रैश्वर्यम् ॥ ४९ ॥

49. Ṛ or ṝ becomes "r" when followed by a Sarveśvara.

rāmabhrātṛ + udayaḥ = rāmabhrātrudayaḥ
rāmabhrātṛ + aiśvaryam = rāmabhrātraiśvaryam (49)

५० । ऌद्वयं लः ।
शक्लर्थः ॥ ५० ॥

50. Ḷ or ḹ becomes "l" when followed by a Sarveśvara.

śakḷ + arthaḥ = śaklarthaḥ (50)

५१ । ए अय्, ऐ आय् ।
कृष्णायुत्कर्षः, गोप्यायासनम् ॥ ५१ ॥

51. E becomes "ay" and ai becomes "āy" when followed by a Sarveśvara.

kṛṣṇe + utkarṣaḥ = kṛṣṇayutkarṣaḥ
gopyai + āsanam = gopyāyāsanam (51)

५२ । ओ अव्, औ आव् ।
विष्णाविह, कृष्णावत्र ॥ ५२ ॥

52. O becomes "av" and au becomes "āv" when followed by a Sarveśvara.

viṣṇo + iha = viṣṇaviha
kṛṣṇau + atra = kṛṣṇāvatra (52)

५३ । ए-ओभ्यामस्य हरो विष्णुपदान्ते ।
हरेऽत्र, विष्णोऽत्र ॥ ५३ ॥

53. After e/o at the end of a word "a" is elided (a is replaced with *avagraha*).

hare + atra = hare 'tra
viṣṇo + atra = viṣṇo 'tra (53)

५४ । अयादीनां यवयोर्वा ।
कृष्ण उत्कर्षः, यमुनाया अर्घः, गोप्या आसनम्, विष्ण इह, कृष्णा अत्र ॥ ५४ ॥

54. Beginning with ay (ay, āy, av and āv when followed by a Sarveśvara) there is optional [elision] of "y" or "v."

kṛṣṇe + utkarṣaḥ = kṛṣṇayutkarṣaḥ = kṛṣṇa utkarṣaḥ
yamunāyai + arghaḥ = yamunāyāyarghaḥ = yamunāyā arghaH
gopyai + āsanam = gopyāyāsanam = gopyā āsanam
viṣṇo + iha = viṣṇaviha = viṣṇa iha
kṛṣṇau + atra = kṛṣṇāvatra = kṛṣṇā atra (54)

५५ । ओरामान्तानामनन्तानां चाव्ययानां सर्वेश्वरे न सन्धिः ।
नो उपेन्द्रः ॥ ५५ ॥

55. There is no change to an indeclinable/interjection ending in an Ananta or "o" when followed by a Sarveśvara.

no + upendraḥ = no upendraḥ (55)

५६ । अदसोऽमीत्यस्य ।
अमी अच्युतप्रियाः ॥ ५६ ॥

56. There is no sandhi of the "amī" form of the pronoun "adas" [when a Sarveśvara follows].

amī acyutapriyaḥ (56)

५७ । महापुरुषस्य च ।
दुराह्वानादौ यत्नविशेषे वाक्यस्यान्ते सम्बोधनपदस्य संसारो महापुरुषः ; प्लुतसंज्ञश्च ॥ ५७ ॥

57. And [there is no sandhi] of a Mahāpuruṣa.

In the special effort of calling from a distance and so forth, the Saṃsāra of the word being called out becomes a Mahāpuruṣa at the end of the sentence. It [the Mahāpuruṣa] also is called a *pluta*. (57)

५८ । अन्त्यसर्वेश्वरादिवर्णाः संसारसंज्ञाः ।
आगच्छ हरे३, तिष्ठ हरे३ ॥ ५८ ॥

58. The letters headed by the final Sarveśvara receive the name Saṃsāra..

āgaccha hare-3
tiṣṭha hare-3. (58)

५९ । विचारे पूर्ववाक्यस्य संसारः ।
तमालो नु३, कृष्णो नु ॥ ५९ ॥

59. In cases of deliberation, the Saṃsāra belongs to the prior sentence.

tamālo nu-3, kṛṣṇo nu. (59)

६० ।

पूर्वार्धस्य त्वरामः स्यादिदुतावुत्तरस्य हि।
विभक्तावयवात्तस्माच्छरामो द्विर्भवत्युत॥

हरा३ इच्छत्रमेतत्ते? पटा३ उच्छत्रमित्यपि॥ ६०॥

60. However, the "a" [replacement] of the prior half should become [the Mahāpuruṣa] and "i" or "u" should come in place of the latter half. Moreover, after those divided parts ("i" or "u"), a "ch" is doubled.

hare + chatram + etat + te = harā-3 icchatrametatte
paṭo + chatram = paṭā-3 ucchatram. (60)

अद्येव, हलीशा, प्रार्च्छति, ऋणार्णं, गोऽग्रं, गवेन्द्र इत्यादयस्त्वाख्यातसमासयोर्वक्ष्यन्ते दुर्गमत्वात् ।

Because they are difficult to understand, *adyeva*, *halīśa*, *prārcchati*, *ṛṇārṇaṃ*, *go 'gram*, *gavendra* and so forth will be described in the verb and compound sections.

Thus ends the Section on Sandhi of the Sarveśvaras.

### 1.2.2 Viṣṇujana Sandhi विष्णुजनसन्धिः

६१ । विष्णुदासो विष्णुपदान्ते हरिघोषे च हरिगदा ।
वागच्युतस्य, वाग्गोविन्दस्य, षड्गोपिका, भगवदिच्छा, ककुब्विष्णोः ॥ ६१ ॥

61. A Viṣṇudāsa, at the end of a word or followed a Harighoṣa, becomes a Harigadā.

vāk + acyutasya = vāgacyutasya;
vāk + govindasya = vāggovindasya;
ṣaṭ + gopikā = ṣaḍgopikā;
bhagavat + icchā = bhagavadicchā;
kakubh + viṣṇoḥ = kakubviṣṇoḥ (61)

६२ । हरिवेणौ हरिवेणुर्वा ।
जगन्नाथः, जगद्नाथ इत्यादि ॥ ६२ ॥

62. Followed by a Harivenu, a Viṣṇudāsa optionally becomes a Harivenu.

jagat + nāthaḥ = jagadnāthaḥ or jagannāthaḥ (62)

६३ । यादवमात्रे हरिकमलम् ।
वाक्कृष्णस्य ॥ ६३ ॥

63. When followed by any Yādava, a Viṣṇudāsa becomes (or remains) a Harikamala.

vāk + kṛṣṇasya = vākkṛṣṇasya (63)

६४ । ततः शश्छो वा ।
सुवाक्छौरिर्वा ॥ ६४ ॥

64. If ś is the Yādava that follows Viṣṇudāsa, ś optionally becomes ch.

suvāk + śauriḥ = suvākchauriḥ (64)

६५ । हो हरिघोषः ।
वाग् घरेः, वाग् हरेः इत्यादि ॥ ६५ ॥

65. Following a Viṣṇudāsa, "h" optionally becomes [a matching] Harighoṣa.

vāk + hareḥ = vāghareḥ or vāgghareḥ (65)

६६ । दतौ परवर्णौ ल-च-टवर्गेषु नित्यम् ।
तल्लक्ष्मीपतेः इत्यादि ॥ ६६ ॥

66. Followed by l, ca-varga, or ṭa-varga, the letters t and d will always change to the letter they precede.

tad + lakṣmīpateḥ = tallakṣmīpateḥ (66)

६७ । तश्च शे ।
तच् शौरेः ॥ ६७ ॥

67. When followed by ś, t becomes c.

tat + śaureḥ = tacśaureḥ (67)

६८ । नोऽन्तश्चछयोः शरामः, टठयोः षरामः, तथयोः सरामः, विष्णुचक्रपूर्वो विष्णुचापपूर्वो वा ।
भगवांश्चलति, भगवांश्छादयति, भगवांष्टीकते, भगवांष्ठक्कुरः, भगवांस्तरति, भगवांस्थूत्करोति ॥ ६८ ॥

68. If a word ends with "n," and is followed by c/ch, ṭ/ṭh, or t/th, then ś, ṣ, or s is inserted respectively. "N" is then represented by Viṣṇucakra or, optionally, by Viṣṇucāpa.

bhagavān + calati = bhagavāṃścalati;
bhagavān + chādayati = bhagavāṃśchādayati;
bhagavān + ṭīkate = bhagavāṃṣṭīkate;
bhagavān + ṭhakkuraḥ = bhagavāṃṣṭhakkuraḥ;
bhagavān + tarati = bhagavāṃstarati;
bhagavān + thūtkaroti = bhagavāṃsthūtkaroti

६९ । शे चान्तो वा ।
भगवाञ्च् शूरः, भगवाञ् शूरः, भगवाञ्च् छूरः॥ ६९ ॥

69. Followed by ś, n becomes ñ. Insertion of c is optional.

bhagavāñc śūraḥ;
bhagavāñ śūraḥ
bhagavāñc chūraḥ (69)

७० । मो विष्णुचक्रं विष्णुजने ।
कृष्णं स्मरति॥ ७० ॥

70. Followed by a Viṣṇujana, m is indicated by Viṣṇucakra.

kṛṣṇam + smarati = kṛṣṇaṃ smarati. (70)

७१ । विष्णुचक्रस्य हरिवेणुर्विष्णुवर्गे विष्णुपदान्तस्य तु वा ।
कृष्णङ्कीर्तयति, कृष्णम्भजति वा । वर्गादन्यत्र न — संवत्सरः ॥ ७१ ॥

71. When followed by a Viṣṇuvarga, Viṣṇucakra becomes the Hariveṇu of that Viṣṇuvarga, but at the end of a word this is optional.[4]

kṛṣṇaṃ + kīrtayati = kṛṣṇaṃkīrtayati or kṛṣṇaṅkīrtayati;
kṛṣṇaṃ + bhajati = kṛṣṇaṃbhajati or kṛṣṇambhajati. (71)

When followed by a Viṣṇujana not in the Viṣṇuvarga, this does not occur — saṃvatsaraḥ (71)

७२ । द्विः सर्वेश्वरमात्राच्छः ।
कृष्णाच्छत्रम्॥ ७२॥

72. Preceded by a Sarveśvara, ch is doubled [to become cch].

kṛṣṇa + chatram = kṛṣṇacchatram. (72)

७३ । आङ्माङ्भ्यां नित्यम् ।
आच्छादयति, माच्छिदत्, ॥ ७३ ॥

73. Ch is always doubled after ā and mā.

ā + chādayati = ācchādayati;
mā + chidat = mācchidat. (73)

७४ । वामनात् ङणना द्विः सर्वेश्वरे ।
पर्यङ्ङनन्तः, सुगण्णनन्तः, कुर्वन्नस्ति ॥ ७४ ॥

74. Preceded by a Vāmana and followed by a Sarveśvara, ṅ, ṇ, and n are doubled.

paryaṅ + anantaḥ = paryaṅṅanantaḥ;
sugaṇ + anantaḥ = sugaṇṇanantaḥ;
kurvan + asti = kurvannasti. (74)

७५ । विष्णुजने विष्णुजनो वा, ह-रौ विना ।
दध्युपेन्द्रस्य, दद्ध्युपेन्द्रस्य वा ॥ ७५ ॥

75. A Viṣṇujana, except for h and r, when preceded by a Vāmana and followed by another Viṣṇujana, is optionally doubled.

dadhi + upendrasya = dadhyupendrasya or daddhyupendrasya. (75)

७६ । ररामात् सर्वेश्वरे तु हरिगोत्रं विना ।
हर्य्यासनं हर्यासनं वा; कार्ष्ष्णं कार्ष्णं वा ॥ ७६ ॥

[4]This means that it is not optional inside a word.

76. A Viṣṇujana, excluding the Harighoṣas, is optionally doubled when preceded by r and followed by either a Viṣṇujana or a Sarveśvara.

hari + āsanaṃ = haryāsanaṃ or haryyāsanaṃ;
kārṣ + ṇaṃ = kārṣṇaṃ or kārṣṣṇaṃ. (76)

७७ । विष्णुजनाद्विष्णुदास्यादर्शनं सवर्गे विष्णुदासे ।
भगवाञ्छूरः, भगवाञ्च्छूरो वा ॥ ७७ ॥

77. After a Viṣṇujana, a Viṣṇudāsa optionally disappears, if a Viṣṇudāsa of the same group follows.

bhagavān + chūraḥ = bhagavāñc chūraḥ or bhagavāñ chūraḥ. (77)

७८ । सरामे टनाभ्यं तुग्वेति वक्तव्यम् ।
षट्त्साधवः , भगवान्त्साधुः ॥ ७८ ॥

78. When ṭ or n are followed by s, t is optionally inserted between them.

ṣaṭ + sādhavaḥ = ṣaṭtsādhavaḥ;
bhagavān + sādhuḥ = bhagavāntsādhuḥ. (78)

इति विष्णुजनसन्धिः

### 1.2.3 Viṣṇusarga अथ विष्णुसर्गसन्धिः

**७९ । विष्णुसर्गः पफयोरुपध्मानीयः, कखयोर्जिह्वामूलीयो वा ।**
कृष्णः फलम्, कृष्ण ॅ फलं वा, कृष्णः परमः, कृष्ण ॅ परमो वा । कः कृष्णः, क॰कृष्णः, कृष्णः खेलति, कृष्ण॰खेलति वा इत्यादि ॥ ७९ ॥

79. Viṣṇusarga before the letters p or ph becomes *upadhmāmīya* and before k or kh becomes *jihvāmūlīya*. These changes are optional.[5]

kṛṣṇaḥ phalam or kṛṣṇaXp phalam;
kṛṣṇaḥ paramaḥ or kṛṣṇaXp paramaḥ;
kaḥ kṛṣṇaḥ or kaXk kṛṣṇaḥ;
kṛṣṇaḥ khelati or kṛṣṇaXk khelati . (79)

**८० । चछयोः शरामष्टठयोः षरामस्तथयोः सरामः ।**
कृष्णश्चरति, कृष्णश्छादयति, कृष्णष्टीकते, कष्ठरामः, कृष्णस्तरति, कृष्णस्थूत्करोति ॥ ८० ॥

80. Viṣṇusarga before the letter c or ch becomes ś, before ṭ or ṭh becomes ṣ, and before t or th becomes s.

kṛṣṇaḥ + carati = kṛṣṇaścarati;
kṛṣṇaḥ + chādayati = kṛṣṇaśchādayati;
kṛṣṇaḥ + ṭīkate = kṛṣṇaṣṭīkate;
kaḥ + ṭharāmaḥ = kaṣṭharāmaḥ;
kṛṣṇaḥ + tarati = kṛṣṇastarati;
kṛṣṇaḥ + thūtkaroti = kṛṣṇasthūtkaroti. (80)

**८१ । शौरिषु शौरिर्वा ।**
कृष्णश् शरणम्, कृष्णष् षण्डो, हरेस् सुरभिर्वा ॥ ८१ ॥

81. Viṣṇusarga before a Śauri optionally becomes the same Śauri.

kṛṣṇaḥ śaraṇam or kṛṣṇaś śaraṇam;
kṛṣṇaḥ ṣaṇḍo or kṛṣṇaṣ ṣaṇḍo;
hareḥ surabhi or hares surabhi. (81)

**८२ । अादरामगोपालयोरुर्नित्यम् ।**
कृष्णोऽत्र, कृष्णो गच्छति ॥ ८२ ॥

82. Viṣṇusarga preceded by the letter a and followed by the letter a or a Gopāla always becomes the letter u.

---

[5] *Upadhmāmīya* is pronounced like an "f" and *jihvāmūlīya* is pronounced like "h."

kṛṣṇaḥ + atra = kṛṣṇa + u + atra = kṛṣṇo 'tra;
kṛṣṇaḥ + gacchati = kṛṣṇa + u + gacchati = kṛṣṇo gacchati. (82)

८३ । अद्वय-भो-भगो-अघोभ्यो लोप्यः, सर्वेश्वरे तु यश्च, न च लोप्ये सन्धिः ।
कृष्ण इह, कृष्णयिह वा; कृष्ण अत्र, कृष्णयत्र वा; भो अनन्त, भोयनन्त वा; भगो अनन्त, भगोयनन्त वा; अघो अवैष्णव, अघोयवैष्णव वा ॥ ८३ ॥

83. Viṣṇusarga is dropped after the advaya (a or ā) and after the words *bho, bhago* and *agho* when followed by a Sarveśvara or a Gopāla[6]. When followed by a Sarveśvara the letter y is optionally inserted and when Viṣṇusarga is elided there is no further *sandhi*.

kṛṣṇa iha or kṛṣṇayiha;
kṛṣṇā atra or kṛṣṇāyatra;
bho ananta or bhoyananta;
bhago ananta or bhagoyananta;
agho avaiṣṇava or aghoyavaiṣṇava. (83)

८४ । र ईश्वरात् सर्वेश्वरगोपालयोः ।
हरेरिदम्, हरिर्गच्छति ॥ ८४ ॥

84. Viṣṇusarga becomes the letter "r" when preceded by an Īśvara and followed by a Sarveśvara or a Gopāla.

hareḥ + idam = hareridam;
hariḥ + gacchati = harirgacchati. (84)

८५ । अह्नो विष्णुसर्गस्य रो रात्रि-रूपरथान्तरादन्येषु ।
अहरहः, अहर्गणः; नेह — अहःपतिः ॥ ८५ ॥

85. The Viṣṇusarga of the word ahaḥ becomes the letter r when followed by any word beginning with a Sarveśvara or a Gopāla except for the words rūpa, rātri, and rathāntara.

ahaḥ + ahaḥ = aharha;
ahaḥ + gaṇaḥ = ahargaṇaḥ;
ahaḥ + pati = ahaḥpati [because the letter p is one of the Yādava the rule does not apply here]. (85)

८६ । रो रे लोप्यः पूर्वश्च त्रिविक्रमः ।
भ्रातः रामानुजं पश्य = भ्राता रामानुजं पश्य; हरिः राधाप्रियः = हरी राधाप्रियः ॥

[6] This does not include situations when the following Sarveśvara is "a," or Viṣṇusarga is preceded by an "a" and followed by a Gopāla, which is covered in the previous *sūtra*.

८६ ॥

86. There is elision of the letter r before the letter r and the vowel which precedes them becomes a Trivikrama.

bhrataḥ + rāmānujaṃ paśya = bhratar + rāmānujaṃ paśya = bhratā rāmānujaṃ paśya;
hariḥ + rādhāpriyaḥ = harir + rādhāpriyaḥ = harī rādhāpriyaḥ. (86)

इति विष्णुसर्ग-सन्धिः ॥
इति श्रीश्रीसंक्षेप-हरिनामामृताख्य-वैष्णवव्याकरणे
संज्ञा-सन्धि-प्रकरणं प्रथमं समाप्तम् ॥ 1 ॥

# Chapter 2

# अथ विष्णुपद-प्रकरणम्
# Viṣṇupada (Noun Declension)

Now the section on Viṣṇu's Words (Nouns) (Viṣṇupada):

> य एकः सर्वरूपाणां सर्वनाम्नां तथाश्रयः ।
> तस्य विष्णोः पदं सर्वं विष्णुभक्त्या निरूप्यते ॥

The feet [words] of Viṣṇu, who is the only resting place of all forms and names, will now be described thoroughly with Viṣṇubhakti [with their inflectional forms].

१ । अधातु-विष्णुभक्तिकमर्थवन्नाम ।
भू-सनन्ताद्या धातवः; स्वादि-तिवाद्या विष्णुभक्तयः ॥ १ ॥

1. That which is not a verbal root and does not have Viṣṇubhakti [inflection], yet has significant meaning, is called a Name (Nāma).

Beginning with *bhū* and ending with *san*, these are the verbal roots. Su, etc., and tiv, etc., are the Viṣṇubhakti suffixes. (1)

२ । प्रकृतिः पूर्वा ।
सा च नाम-धातु-भेदाद्विविधा ॥ २ ॥

2. Prakṛti (Primal Nature) is [comes] before.

She has two varieties, Name and Verb. 2)

३ । प्रत्ययः परः ।
स च स्वाद्याख्यात-कृत्तद्धितभेदाच्चतुर्विधः ॥ ३ ॥

3. Pratyaya (termination) [affix] is [comes] after.

It has four different forms: *su-ādi* (nominal), [*tiv-ādi*] verbal, *kṛt* (primary), and *taddhita* (secondary). (3)

४ । तत्र नाम्नः सुँ औ जस् (प्रथमा),
अम् औ शस् (द्वितीया),
टा भ्याम् भिस् (तृतीया),
ङे भ्याम् भ्यस् (चतुर्थी),
ङसि भ्याम् भ्यस् (पञ्चमी),
ङस् ओस् आम् (षष्ठी),
ङि ओस् सुप् (सप्तमी) ।

4. Among those, the teminations of names are:
*sŭ*, *au*, and *jas* for the first case.
*am*, *au*, and *śas* for the second.
*ṭā*, *bhyām*, and *bhis* for the third.
*ṅe*, *bhyām*, and *bhyas* for the fourth.
*ṅasi*, *bhyām*, and *bhyas* for the fifth.
*ṅas*, *os*, and *ām* for the sixth.
*ṅi*, *os*, and *sup* for the seventh. (4)

५ । तत्र ज-ट-श-पा इतः, उँश्च सौँः, ङसेरिश्च ।
एति गच्छति न तिष्ठतीति इत्, अनुबन्धश्च ॥ ५ ॥

5. In those, the letters ja, ṭa, śa, and pa are indicators, so is the ŭ of sŭ, as well as the i of *ṅasi*.

The indicator (*it*) comes and it goes; it does not stay. It is also called *anubandha*. (5)

६ । नामसंज्ञश्चतुर्विधः ।
यथा पुंलिङ्गः पुरुषोत्तमः; स्त्रीलिङ्गो लक्ष्मीः; नपुंसकलिङ्गो ब्रह्मसंज्ञः; अलिङ्गोऽव्ययः ॥ ६ ॥

6. Names have four classifications.

Namely, the Puruṣottama (Supreme Male) or masculine gender, the Lakṣmī (Goddess of Fortune) or feminine gender, Brahman (the Impersonal Absolute) or neuter gender, and Avyaya (indeclinable) or no gender. (6)

## 2.1 अथ सर्वेश्वरान्ताः पुरुषोत्तमलिङ्गाः (Masculine ending with the Sarveśvara)

तत्र प्रथमा कृष्ण-सुँ —

७ । स-र-रामयोर्विष्णुसर्गो विष्णुपदान्ते ।
कृष्णः, एवं कृष्णौ, कृष्णाः ॥ ७ ॥

In that, the first case: *kṛṣṇa* + sŭ

7. The letters s and r become Viṣṇusarga at the end of a word.

*kṛṣṇaḥ, kṛṣṇau, kṛṣṇāḥ* (7)

८ । दशावतारादम्शसोररामहरः ।
कृष्णम्, कृष्णौ ॥ ८ ॥

8. Preceded by a Daśāvatāra, the 'a' of *am* and śas is elided.

*kṛṣṇam,*[1] *kṛṣṇau* (8)

९ । दशावतारस्य त्रिविक्रमः शसि तस्मात् सो नः पुंसि ।
कृष्णान् ॥ ९ ॥

9. A Daśāvatāra becomes a Trivikrama before *śas*. The letter 's' becomes 'n' in the masculine.

*kṛṣṇān*[2] (9)

१० । अरामान्तः कृष्णसंज्ञः ।

10. [A Puruṣottama] ending with 'a' is called Kṛṣṇa. (10)

११ । कृष्णात् टा इनः ।
कृष्णेन ॥ ११ ॥

---

[1] kṛṣṇa + am = kṛṣṇa + m = kṛṣṇam
[2] kṛṣṇa + śas = kṛṣṇā + śas = kṛṣṇā + s = kṛṣṇā + n = kṛṣṇān

11. Following a Kṛṣṇa, *ṭā* becomes *ina*.

*kṛṣṇena*[3] (11)

१२ । कृष्णस्य त्रिविक्रमो गोपाले ।
कृष्णाभ्याम् ॥ १२ ॥

12. [The final a] of a Kṛṣṇa becomes a Trivikrama when followed by a Gopāla.

*kṛṣṇābhyām*[4] (12)

१३ । कृष्णाद्भिस् ऐस् ।
कृष्णैः ॥ १३ ॥

13. Following a Kṛṣṇa, *bhis* becomes *ais*.

*kṛṣṇaiḥ*[5] (13)

१४ । कृष्णात् ङेर्यः ।
कृष्णाय, कृष्णाभ्याम् ॥ १४ ॥

14. Following a Kṛṣṇa, *ṅe* becomes *ya*.

*kṛṣṇāya,*[6] *kṛṣṇābhyām* (14)

१५ । कृष्णस्य ए वैष्णवे बहुत्वे ।
कृष्णेभ्यः ॥ १५ ॥

15. In the plural form, [the 'a'] of a Kṛṣṇa becomes 'e' when followed by a Vaiṣṇava.

*kṛṣṇebhyaḥ*[7] (15)

१६ । कृष्णात् ङसेरात् ।
कृष्णात्, कृष्णाभ्याम्, कृष्णेभ्यः ॥ १६ ॥

16. Following a Kṛṣṇa, *ṅasi* becomes *āt*.

*kṛṣṇāt,*[8] *kṛṣṇābhyām, kṛṣṇebhyaḥ* (16)

---

[3] kṛṣṇa + ina = kṛṣṇena
[4] kṛṣṇa + bhyām = kṛṣṇā + bhyām = kṛṣṇābhyām
[5] kṛṣṇa + bhis = kṛṣṇa + ais = kṛṣṇaiḥ
[6] kṛṣṇa + ṅe = kṛṣṇa + ya = kṛṣṇā + ya = kṛṣṇāya
[7] kṛṣṇa + bhyas = kṛṣṇe + bhyas = kṛṣṇebhyaḥ
[8] kṛṣṇa + ṅasi = kṛṣṇa + āt = kṛṣṇāt

१७ । कृष्णात् ङसः स्य ।
कृष्णस्य ॥ १७ ॥

17. Following a Kṛṣṇa, *ṅas* becomes *sya*.

*kṛṣṇasya*[9] (17)

१८ । कृष्णस्य ए ओसि ।
कृष्णयोः ॥ १८ ॥

18. A Kṛṣṇa gains an 'e' when *os* follows.

*kṛṣṇayoḥ*[10] (18)

१९ । वामन-गोपी-राधाभ्यो नुडामि ।
उटावितौ ॥ १९ ॥

19. After a Vāmana, a Gopī, or a Rādhā, a *nuṭ* ['n'] comes before *ām*.

'U' and 'ṭ' are indicators. (19)

२० । वामनस्य त्रिविक्रमो नामि, नृ-शब्दस्य तु वा, न तिसृ-चतसृोः ।
कृष्णानाम्, कृष्णे, कृष्णयोः ॥ २० ॥

20. A Vāmana becomes a Trivikrama when *nām* follows, optionally for *nṛ*, and not for *tisṛ*[11] and *catasṛ*.[12]

*kṛṣṇānām*,[13] *kṛṣṇe*, *kṛṣṇayoḥ* (20)

२१ । ईश्वर-हरिमित्र-कङेभ्यो प्रत्यय-विरिञ्चि-सस्य षो, नुम-विष्णुसर्ग-व्यवधानेऽपि, न तु विष्णुपदाद्यन्त-सातीनाम् ।
कृष्णेषु ॥ २१ ॥

21. After an Īśvara, a Harimitra, a 'k,' or a 'ṅ,' the 's' of a suffix or Viriñci becomes 'ṣ,' even when separated by a 'n' or a Viṣṇusarga, but not at the beginning or end of a word or in the case of *sāt*.[14]

*kṛṣṇeṣu*. (21)

[9] kṛṣṇa + ṅas = kṛṣṇa + sya = kṛṣṇasya
[10] krrṣṇa + os = kṛṣṇe + os = kṛṣṇay + oḥ = kṛṣṇayoḥ
[11] The feminine form of *trayaḥ*, three
[12] The feminine form of *catvāraḥ*, four
[13] kṛṣṇa + ām = kṛṣṇa + n + ām = kṛṣṇā + nām = kṛṣṇānām
[14] *Sāt* is a secondary suffix (*taddhita*) indicating that something is completely changed into the something else, as in *ātmasāt* or *bhasmasāt*.

२२ । सम्बोधने सुर्बुद्धसंज्ञः ।
सम्बुद्धिश्च ॥ २२ ॥

22. In calling, *su* is called a Buddha.

And [it is also named] *sambuddhi*. (22)

२३ । ए-ओ-वामनेभ्यो बुद्धस्यादर्शनम् ।
हे कृष्ण, हे कृष्णौ, हे कृष्णाः । एवं रामः, रामौ, रामाः; रामम्, रामावित्यादि ॥ २३ ॥

23.After an 'e,' 'o,' or a Vāmana, a Buddha is unseen.

*he kṛṣṇa, he kṛṣṇau, he kṛṣṇāḥ*. Thus [are formed] *rāmaḥ, rāmau, rāmāḥ ; rāmam, rāmau*, and so forth. (23)

२४ । र-ष-ऋद्वयेभ्यो नस्य णः, सर्वेश्वर-ह-य-व-कवर्ग-पवर्ग-व्यवधानेऽपि, समान-विष्णुपदे, न तु विष्णुपदान्तस्य ।
रामान्, रामेण, इत्यादि । एवं केशव-नारायण-माधव-गोविन्दादयः कृष्णतुल्याः ॥ २४ ॥

24. After an 'r,' 'ṣ,' or one of the two 'ṛ,' an 'n' in the same word (Viṣṇupada) becomes 'ṇ,' even if separated by Sarveśvara, h, y, v, members of the ka group, or members of the pa group, but not a 'n' at the end of a word.

rāmān, rāmeṇa, and so forth. Keśava, Nārāyaṇa, Mādhava, and Govinda are [treated] the same as Kṛṣṇa.

२५ । शसादयो यदु-संज्ञाः ।

25. The endings beginning with śas are called Yadu.

२६ । अत्र पाद-दन्त-मास-युष इत्येतेषां पद्-दत्-मास्-यूषन् इत्येते विरिञ्चयो यदुषु वा ।
पदः पादान्, पदा पादेन इत्यादि ॥ २६ ॥

26 Pāda, danta, māsa, and yuṣa are optionally replaced by pad, dat, mās, and yūṣsan when a Yadu follows it.

padaḥ pādān, padā pādena, and so forth.

अथ धातुस्वरूप आरामान्तो विश्वपाशब्दः ।
विश्वपाः, विश्वपौ, विश्वपाः;

विश्वपाम्, विश्वपौ ॥

Now, the stem *viśvapā*, [an example of a masculine stem] ending in ā and having the nature of a verbal root:

viśvapāḥ, viśvapau, viśvapāḥ
viśvapām, viśvapau,

२७ । आरामहरो यदुसर्वेश्वरे, न त्वापः ।
विश्वपः;
विश्वपा, विश्वपाभ्याम्, विश्वपाभिः;
विश्वपे, विश्वपाभ्याम्, विश्वपाभ्यः;
विश्वपः, विश्वपाभ्याम्, विश्वपाभ्यः;
विश्वपः, विश्वपोः, विश्वपाम्;
विश्वपि, विश्वपोः, विश्वपासु;
हे विश्वपाः इत्यादि ।
हाहादीनामारामहरविधिर्वा ॥ २७ ॥

27. The ā is lost before Yadus that begin with Sarveśvara, except in the case of āp [the feminine ending].

viśvapaḥ viśvapā, viśvapābhyām, viśvapābhiḥ
viśvape, viśvapābhyām, viśvapābhyaḥ
viśvapaḥ, viśvapābhyām, viśvapābhyaḥ
viśvapaḥ, viśvapoḥ, viśvapām
viśvapi, viśvapoḥ, viśvapāsu
he viśvapāḥ, and so forth. The loss of the ā is optional for Hāhā and some other word ending in ā.

२८ । इ-उ-रामान्तो हरिसंज्ञः ।
अग्निः, घिः, च । हरिः ॥ २८ ॥

28 [Masculine] stems ending in 'i' or 'u' are called Hari.

Also agniḥ and ghiḥ.
hariḥ,

२९ । हरित औ पूर्वसवर्णः ।
हरी ॥ २९ ॥

29. After a Hari, 'au' becomes like the previous letter.

harī,[15]

[15] hari + au = hari + i = harī

३० । इद्वयस्य ए, उद्वयस्य ओ, ऋद्वयस्य अर्, लृद्वयस्य अल् गोविन्द-संज्ञः ।
गुण-संज्ञश्च ॥ ३० ॥

30. E for the two 'i'-s [i and ī], o for the two 'u'-s [u and ū], ar for the two 'ṛ'-s [ṛ and ṝ, and al for the two 'ḷ'-s [ḷ and ḹ] are called Govinda.

And have the name *guṇa*, too.

३१ । ङितो वृष्णिसंज्ञाः ॥ ३१ ॥

31. Those with ṅ as *it* are called the Vṛṣṇi.

३२ । हरेर्गोविन्दो जसि वृष्णिषु बुद्धे च ।
हरयः;
हरिम्, हरी, हरीन् ॥ ३२ ॥

32. When *jas*, a Vṛṣṇi or a Buddha follows, a Hari gets Govinda.

harayaḥ;[16]
harim, harī, harīn;

३३ । हरितष्टा ना, न तु लक्ष्म्याम् ।
हरिणा, हरिभ्याम्, हरिभिः;
हरये, हरिभ्याम्, हरिभ्यः ॥ ३३ ॥

33. After a Hari ṭā becomes nā, but not in Lakṣmī [the feminine gender].

hariṇā, haribhyām, haribhiḥ;
haraye,[17] haribhyām, haribhyaḥ;

३४ । ए-ओभ्यां ङसि-ङसोररामहरः ।
हरेः, हरिभ्याम्, हरिभ्यः;
हरेः, हर्योः, हरीणाम् ॥ ३४ ॥

34. After e and o, the 'a' of ṅasi and ṅas is dropped.

hareḥ,[18] haribhyām, haribhyaḥ:
hareḥ, haryoḥ, harīṇām;

[16] hari + as [jas] = hare [Govinda] + as = haray + as = harayas = harayaḥ.
[17] hari + ṅe [Vṛṣṇi] = hare + e = haray + e = haraye.
[18] hari + ṅasi [Vṛṣṇi] = hare + as = hare + s = hareḥ

३५ । हरितः ङेरौच् ।
चराम इत् ॥ ३५ ॥

35. After a Hari ṅi becomes *auc*.

The letter 'c' is *it*.

३६ । अन्त्यसर्वेश्वरादिवर्णाः संसारसंज्ञाः ।

36. The letters beginning with the final Sarveśvara are called Saṃsāra.

३७ । संसारस्य हरश्चिति ।
डित् इति प्राञ्चः । हरौ, हर्योः, हरिषु;
हे हरे । एवं रवि-कव्यादयः । त्रिशब्दो नित्यबहुवचनान्तः । त्रयः, त्रीन्, त्रिभिः;
त्रिभ्यः, त्रिभ्यः ॥ ३७ ॥

37. A Saṃsāra is eliminated when something that has 'c' as *it* follows.

'Ḍ' is the *it* [for this] say the ancients.

harau, haryoḥ, hariṣu, he hare.

Thus are formed *ravi*, *kavi*, and the rest.

The word *tri* [three] always has the plural endings:

trayaḥ, trīn, tribhiḥ, tribhyaḥ, tribhyaḥ.

३८ । त्रेस्त्रयो नामि स्वार्थे ।
त्रयाणाम् । अस्वार्थे तु प्रियत्रीणाम् । एवं कति-यति-ततीनाम् ॥ ३८ ॥

38. *Traya* replaces *tri* when *nām* follows provided it [tri] stands for itself.

trayāṇām. When not standing for itself, *priyatrīṇām*. Thus are formed *kati*, *yati*, and *tati*.

३९ । षणान्त-सङ्ख्यातः कतेश्च जस्-शसोर्महाहरः स्वार्थे ॥ ३९ ॥

39. After a number ending in 'ṣ' and 'ṇ' or after *kati*, jas and śas are completely eliminated, provided they [ie. numbers ending in ṣ or

ṇ and *kati*] stand for themselves.

अथ सखिशब्दः

40 । ऋराम-सखिभ्यां सोराच्, बुद्धं विना ।

संसारस्य हरः — सखा ॥ 40 ॥

**Now the word *sakhi*:**

40. After ṛ and sakhi ā replaces su, except for the Buddha.

The Saṃsāra is lost, too. Thus: sakhā.

४१ । अद्वयस्य आ, इद्वयस्य ऐ, उद्वयस्य औ, ऋद्वयस्य आर्, ऌद्वयस्य आल् वृष्णीन्द्र-संज्ञः ।

वृद्धिश्च ॥ ४१ ॥

41. Ā in the case of the 'a' pair, ai in the case of the 'i' pair, au in the case of the 'u' pair, ār in the case of the 'ṛ' pair, and āl in the case of the 'ḷ' pair called Vṛṣṇīndra.

And *vṛddhi*, too.

४२ । स्वादयः पञ्च पाण्डवाः । घुटः, सुटश्च ॥ ४२ ॥

42. The five [endings] headed by su[19] are called Pāṇḍava.

Also *ghuṭ* and *suṭ*.

४३ । सख्युर्वृष्णीन्द्रः सुवर्जं पाण्डवेषु ।

सखायौ, [सखायः;
सखायम्, सखायौ,] सखीन् ॥ ४३ ॥

43. Sakhi gets the Vṛṣṇīnda [of 'i'], except in the case of su, when the Pāṇḍava follow.

sakhāyau, [sakhāyaḥ;
sakhāyam, sakhāyau,] sakhīn.

४४ । न सखिर्हरिसंज्ञष्टादौ, पतिस्त्वसमासे । सख्या, [सखिभ्याम्, सखिभिः;] ॥ ४४ ॥

[19] su, au, jas, am, and śas

44. Sakhi does not get the name Hari before ṭā and the rest, but pati does when it is not in a compound.

sakhyā, [sakhibyām, sakhibhiḥ;]

४५ । ख्य-त्याभ्यां ङसि-ङसोरुस् ।

सख्युः, [सखिभ्याम्, सखिभ्यः;
सख्युः, सखिभ्याम्, सखिभ्यः;]

45. After *khya* and *tya* ṅaśi and ṅas are replaced by us.

sakhyuḥ, [sakhibhām, sakhibhyaḥ;
sakhyuḥ, sakhibhyām, sakhibhyaḥ;]

४६ । सखिपतिभ्यां ङेरौ ।

सख्यौ, [सख्योः, सखिषु;] हे सखे इत्यादि ॥ ४६ ॥

ईरामान्तो दैत्यप्रमी-शब्दः । दैत्यान् प्रमीनाति हिनस्तीति क्विबन्तो विष्णुवाची ।दैत्यप्रमीः इत्यादि सुगमम् । उरामान्त-विष्णुशब्दः हरिसूत्रैरेव साधनम्; विष्णुः, विष्णू, विष्णवः इत्यादि ।

46. After Sakhi and pati ṅi is replaced by au.

sakhyau, [sakhyoḥ, sakhiṣu;]
he sakhe and so forth.

The word ending in ī, *daityapramī*, meaning "he destroys the daityas," has the suffix *kvip* and refers to Viṣṇu. [Its formation] daityapramīḥ and so forth is easy to do. The word ending in *u*, Viṣṇu, is contructed with the same *sūtra* that apply to Hari: viṣṇuḥ, viṣṇū, viṣṇavaḥ, and so forth.

कृष्णश्रीः —

## 47 । धातोरीदूतोरियुवौ सर्वेश्वरे बहुलम् ।

कृष्णश्रियौ, कृष्णश्रियः इत्यादि ।भावे क्विपि भूः, भुवौ, भुवः इत्यादि । विश्वनीः, विश्वन्यौ विश्वनियौ, विश्वन्यः विश्वनियः इत्यादि ।षष्टीबहुत्वे विश्वन्यां विश्वनियाम् ॥ 47 ॥

**Now kṛṣṇaśīḥ:**

47. The ī and ū of verbal roots are replaced by *iy* and *uv*, respectively, in the plural when the Sarveśvara follow.

Kṛṣṇaśriyau, Kṛṣṇaśriyaḥ and so forth.

With the *kvip* suffix in the sense of an abstract noun:
bhūḥ, bhuvau, bhuvaḥ and so forth.

Viśvanīḥ, viśvanyau viśvaniyau;
viśvanyaḥ viśvaniyaḥ and so forth.
In the sixth case plural [one gets] viśvanyām or viśvaniyām.

४८ । नीराधाभ्यां ङेराम् ।

विश्वन्याम् ॥ ४८ ॥

48. After nī and a Rādhā (feminine form), ām replaces ṅi.

viśvanyām.

अथ ऋरामान्ताः ; तत्र पितृ-शब्दः ; पिता —

४९ । ऋरामस्य गोविन्दः पाण्डवेषु ङौ च ।

पितरौ, पितरः इत्यादि । पितॄन्, पित्रा, पितृभ्याम्, पितृभिः इत्यादि ॥ ४९ ॥

**Now masculines ending in ṛ:**

५० । ऋरामतो ङसिङसोरस्य उच् ।

पितुः इत्यादि ॥ ५० ॥

५१ । बुद्धे गोविन्दः ॥ ५१ ॥

५२ । राधाविष्णुजनाभ्यामीपश्च त्रिविक्रमात् सोऽर्हरः ।

हे पितः । नृ-शब्दः —
ना, नरौ, नरः । षष्ठी — नृणां, नॄणाम् । हे नः॥ ५२॥

कृष्णरै-शब्दः —

५३ । राय आ स-भोः ।

कृष्णराः, कृष्णरायौ, कृष्णरायः इत्यादि ॥ ५३ ॥

गो-शब्दः —

५४ । ओ औ पाण्डवेषु ।

गौः, गावौ, गावः ॥ ५४ ॥

५५ । ओ आ अम्-शसोर्न च सो नः ।

गाम्, गावौ, गाः; गवा, गोभ्यामित्यादि । हे गौः ।

एवं ग्लौः, ग्लावौ, ग्लावः इत्यादि । हे ग्लौः ॥ ५५ ॥

इति सर्वेश्वान्ताः पुरुषोत्तमलिङ्गाः ।

## 2.2 अथ सर्वेश्वरान्ता लक्ष्मीलिङ्गाः

५६ । आरामान्तलक्ष्मी राधासंज्ञा ।
श्रद्धासंज्ञा च। तत्र राधाशब्दः। राधा॥ ५६॥

५७ । राधाब्रह्मभ्यामौ ई।
राधे, राधाः,
[राधाम्, राधे, राधाः]॥ ५७॥

५८ । राधाया ए टौसोर्बुद्धे च।
राधया, राधाभ्याम्, राधाभिः॥ ५८॥

५९ । राधातो याप् वृष्णिषु।
राधायै, राधाभ्याम्, राधाभ्यः
राधायाः, राधाभ्याम्, राधाभ्यः
राधायाः, राधयोः, राधानाम्।
लाद्यरकान्न नुट् — राधायाम्, राधयोः, राधासु।
हे राधे इत्यादि। एवं रमारामाश्रद्धाम्बादयश्च॥ ५९॥

६० । अम्बादीनां गोप्याश्च वामनो बुद्धेः।
हे अम्ब॥ ६०॥

६१ । जराया जरस् वा सर्वेश्वरे।
जरा, जरसौ जरे, जरसः जराः
जरसम् जरामित्यादि। एवं निर्जरशब्दोऽपि विकल्प्यते॥ ६१॥

इरामान्तो भक्तिशब्दो पाण्डवेषु हरिशब्दवत् शसि भक्तीः
भक्त्या इत्यादि।

६२ । हरित आप् वा वृष्णिषु लक्ष्म्यां, नित्यं गोप्याः।
भक्त्यै भक्तये (चतुर्थी) ;
भक्त्याः भक्तेः (पञ्चमी) ;
भक्त्याः भक्तेः, भक्त्योः भक्तीनाम् (षष्ठी) ;
भक्त्यां भक्तौ, भक्त्योः भक्तिषु (सप्तमी) ;
हे भक्ते

एवं बुद्धि-मति-धृति-प्रभृतयः।

अथ धेनुशब्दः

धेनुः, धेनू, धेनवः ;
धेनुं, धेनू, धेनूः इत्यादि। वृष्णिषु वा —

धेन्वै धेनवे ;
धेन्वाः धेनोः ;
धेन्वां धेनौ ;
हे धेनो ॥ ६२॥

६३ । लक्ष्मीस्थयोस्त्रिचतुरोस्तिसृचतसृ विष्णुभक्तौ ।

६४ । तिसृचतस्रो रः सर्वेश्वरे ।

तिस्रः, तिस्रः, तिसृभिः, तिसृभ्यः, तिसृभ्यः, तिसृणां, तिसृषु॥ ६३-६४॥

ईरामान्तो गोपीशब्दः —

६५ । ई-ऊ-लक्ष्मीर्गोपीसंज्ञा ।

नदीसंज्ञा च ।
गोपी, गोप्यौ, गोप्यः ;
गोपीं, गोप्यौ, गोपीः ;
गोप्या, गोपीभ्यामित्यादि । ङौ गोप्याम्; हे गोपि! एवं नदी-महीप्रभृतयः ।
सखी च सखी सख्यौ सख्यः । ङौ सख्याम् । त्रिविक्रमान्न सोर्हरः अतिगोपिः ।

अवी-तन्त्री-तरी-लक्ष्मी-ह्री-धी-श्रीणामुणादिना ।
शब्दानान्तु भवत्येषां सुलोपो न कदाचन॥

लक्ष्मीः, लक्ष्म्यौ, लक्ष्म्यः ;
लक्ष्मीमित्यादि गोपीवत्॥ ६५ ॥

स्त्रीशब्द ईवन्तोऽतः सोर्हरः

स्त्री

६६ । स्त्रीभ्रुवोरियुवौ सर्वेश्वरे स्त्रिया अम्शसोर्वा ।

स्त्रियौ, स्त्रियः ;
स्त्रियं स्त्रीम्, स्त्रियौ, स्त्रियः स्त्रीः ;
स्त्रिया, स्त्रीभ्यां, स्त्रीभिः ;
स्त्रियै, स्त्रीभ्यां, स्त्रीभ्यः ;
स्त्रियाः, स्त्रीभ्यां, स्त्रीभ्यः ;
स्त्रियाः, स्त्रियोः, स्त्रीणाम् ;
स्त्रियां, स्त्रियोः, स्त्रीषु ।
हे स्त्रि ॥ ६६॥

श्रीशब्दः —

श्रीः, श्रियौ, श्रियः ;
श्रियं, श्रियौ, श्रियः।

## ६७। नेयुवस्थानं गोपी स्त्रियं विना वृष्णिाष्वामि च वा।

श्रिया, श्रीभ्यां, श्रीभिः ;
श्रियै श्रिये, श्रीभ्यां, श्रीभ्यः ;
श्रियाः, श्रियः ... ;
श्रियाः स्त्रियः, श्रियोः, श्रीणां ;
श्रियां श्रियि, श्रियोः, श्रीषु ;
हे श्रीः॥

एवं भ्रूधीप्रभृतयः
भ्रूः, भ्रुवौ, भ्रुवः ;
भ्रुवमित्यादि।

प्रकृष्टा धी — प्रधीः, प्रधियौ, प्रधियः;
ङे — प्रधियै प्रधिये, प्रधीभ्यामित्यादि।

वधूप्रभृतीनां लक्ष्मीशब्दवत् —
वधूः, वध्वौ, वध्वः ;
हे वधु

मातृशब्दः पितृशब्दवत्, शसि तु मातॄः।

रैशब्दः स्त्रियामपीति क्षीरस्वामी तेन पूर्ववत्।

गोशब्दः पूर्ववत्। द्योशब्दो गोवत्। नौशब्दो ग्लौवत्॥ ६७॥

इति सर्वेश्वरान्ताः लक्ष्मीलिङ्गः।